This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2923 विषय साहित्यशास्त्र

नाव श्रीमद् ध्यात्म रामायण

लेखक/लिपीकार सुंदरकांड

पृष्ठ 14 काळ — पुर्ण/ अपुर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथश्रीमदध्यात्मरामायणेसुंदरकांडप्रारंभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः शतेति लिलंघयिषुः स्वार्थेणिच् आनंदसंदोहः तत्समूहरूपः तत्समूहवान्वा १ २ रामनिर्मुक्तंरामत्यक्तम् पश्यामीतिभा विन्यपिवर्तमानत्वारोपोवश्यंभावित्वद्योतनाय ३ कृतार्थःजगन्मातृदर्शनेनेतिभावः ममसमुद्रलंघनमकिंचित्करमित्याह प्राणेति ४ अ पारमित्यभायान्वयि त्रिविधपरिच्छेदशून्यंतत्पदंतत्स्वरूपम् तदंगभूतायाअंगुलिस्तद्भूषणभूतायामुद्रिकासाअस्यास्तीत्यर्शाद्यच् ५ अल्पवारिधिमित्यपारत्वं पोधेर्व्यतिरेकालंकारः तंलंघयामीतिकिंवक्तव्यमित्यन्वयः बाहूइत्यादिवानरोत्प्लवनजातिवर्णनम् आयत

श्रीमहादेवउवाच शतयोजनविस्तीर्णंसमुद्रंमकरालयम् लिलंघयिषुरानंदसंदोहोमारुतात्मजः १ ध्यात्वारामंपरात्मानमिदंवचनमब्रवीत् पश्यंतुवानराःसर्वेगच्छंतंमांविहायसा २ अमोघंरामनिर्मुक्तंमहाबाणमिवाखिलाः पश्याम्यद्यैवरामस्यपत्नींजनकनंदिनीम् ३ कृतार्थोहंकृतार्थोहंपुनःपश्यामिराघवम् प्राणप्रयाणसमयेयस्यनामसकृत्स्मरन् ४ नरस्तीर्त्वाभवांभोधिमपारंयातितत्पदम् किंपुनस्तस्यदूतोहंतदंगांगुलिमुद्रिकः ५ तमेवहृदयेध्यात्वालंघयाम्यल्पवारिधिम् इत्युक्त्वाहनुमान् बाहूप्रसार्यायतवालधिः ६ ऋजुग्रीवोर्ध्वदृष्टिःसन्नाकुंचितपदद्वयः दक्षिणाभिमुखस्तूर्णंपुप्लुवेनिलविक्रमः ७ आकाशात्त्वरितंदेवैर्वीक्ष्यमाणोजगामसः दृष्ट्वानिलसुतंदेवागच्छंतंवायुवेगतः ८ परीक्षणार्थंसत्वस्यवानरस्येदमब्रुवन् गच्छत्येषमहासत्त्वोवानरोवायुविक्रमः ९ लंकांप्रवेष्टुंशक्तोवानवाजानीमहेबलम् एवंविचार्यनागानांमातरंसुरसाभिधाम् १० अब्रवीद्देवतावृंदःकौतूहलसमन्वितः गच्छत्वंवानरेंद्रस्यकिंचिद्विघ्नंसमाचर ११

वालधिःप्रसारितपुच्छः ६ ऋजुग्रीवऊर्ध्वदृष्टिरित्यर्थःकर्मधारयः अनिलोवायुः तत्सदृशपराक्रमः ७ आकाशात्आकाशेस्थित्वेत्यर्थः कौसल्याहृदयायदशरथात्मजायसीतापतयेअयोध्याधीशायराघवायनमोस्तु वानरस्यसत्वस्यवानरीयबलस्यपरीक्षणार्थमिदमब्रुवन् विचारयामासुरित्यर्थः तद्दृश्यति एवंविचार्येतिधातूनामनेकार्थत्वात् ब्रुवोपिविचारेवृत्तिः ९ लंकाप्रवेशेशक्तोथवानेतिसंदेहस्तस्मादस्यबलंजानीमहे निर्णेष्यामइत्यर्थः १० देवतावृंदःदेवतासमूहः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ १३ क्षुधासंपीडित आत्मायस्यास्तस्याइत्यर्थः १४ १५ निवेक्ष्येप्रवेक्ष्यामि, मेवक्त्रंप्रविश्यततोनिःसृत्यगच्छेत्यर्थः १७ योज·
नमात्रदीर्घदेहः १८ १९ त्रिंशद्योजनसंमितंवपुश्चकारेतिशेषः २० २१ २२ २३ पुनर्गत्वाकिष्किंधामितिशेषः २४ २५ मणिकां·

ज्ञात्वातस्यबलंबुद्धिंपुनरेहित्वरान्विता इत्युक्त्वासाययौशीघ्रंहनुमद्विघ्नकारणात् १२ आवृत्यमा
र्गंपुरतःस्थित्वावानरमब्रवीत् एहिमेवदनंशीघ्रंप्रविशस्वमहामते १३ देवैस्त्वंकल्पितोभक्षःक्षु
धासंपीडितात्मनः तामाहहनुमान्मातरहंरामस्यशासनात् १४ गच्छामिजानकींद्रष्टुंपुनरागम्य-
सत्वरः रामायकुशलंतस्याःकथयित्वात्वदाननम् १५ निवेक्ष्येदेहिमेमार्गंसुरसायैनमोस्तुते इत्यु
क्त्वापुनरेवाहसुरसाक्षुधितास्म्यहम् १६ प्रविश्यगच्छमेवक्त्रंनोचेत्त्वांभक्षयाम्यहम् इत्युक्तोहनु
मानाहमुखंशीघ्रंविदारय १७ प्रविश्यवदनंतेद्यगच्छामित्वरयान्वितः इत्युक्त्वायोजनायामदेहो
भूत्वापुरस्थितः १८ दृष्ट्वाहनुमतोरूपंसुरसापंचयोजनम् मुखंचकारहनुमान्द्विगुणंरूपमाद
धत् १९ ततश्चकारसुरसायोजनानांचविंशतिम् वक्त्रंचकारहनुमांस्त्रिंशद्योजनसम्मितम् २०
ततश्चकारसुरसापंचाशद्योजनायतम् वक्त्रंतदाहनूमांस्तुबभूवांगुष्ठसन्निभः २१ प्रविश्यवदनंत
स्याःपुनरेत्यपुरःस्थितः प्रविष्टोनिर्गतोहंतेवदनंदेवितेनमः २२ एवंवदंतंदृष्ट्वासाहनूमंतमथाब्रवीत्
गच्छसाधयरामस्यकार्यंबुद्धिमतांवर २३ देवैःसंप्रेषिताहंतेबलंजिज्ञासुभिःकपे दृष्ट्वासीतांपुन
र्गत्वारामंद्रक्ष्यसिगच्छभो २४ इत्युक्त्वासाययौदेवलोकंवायुसुतःपुनः जगामवायुमार्गेणगरुत्मा
निवपक्षिराट् २५ समुद्रोप्याहमैनाकंमणिकांचनपर्वतम् गच्छत्येषमहासत्वोहनुमान्मारुतात्म
जः २६ रामस्यकार्यसिद्ध्यर्थंतस्यत्वंसचिवोभव सगरैर्वर्धितोयस्मात्पुराहंसागरोभवम् २७

चनपर्वतंमणयादिपुक्तशृंगपर्वतम् २६ सचिवोभवमध्येविश्रामदानेनसहायोभवेत्यर्थः तत्सहायार्थनिमित्तंमत्प्रेरणेकोहेतु १
स्तत्राह सगरैरितिपुरापूर्वंसगरैर्वर्धितइतिहेतोरहंसागरस्तन्नामाभवम् २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यवंशेचरामस्तत्कार्यार्थंचायंगच्छति २८ अतस्त्वमुत्तिष्ठेत्यन्वयः २९ नानामणिमयैःशृंगैर्महोन्नतइत्यन्वयः तस्योपरिन राकृतिर्मनुष्याकारेणास्थितोमैनाकःप्राह ३० ३१ विश्राम्येत्यार्षम् ३२ कथंभवेदित्यादेरनुचितंतदित्यर्थः तत्रहेतुर्गंतव्यंत्वरितं मयेति ३३ कराग्रेणास्पृष्टशिखरोययाविस्यन्वयः छायास्पर्शमात्रेणजंतूनांगतिनिरोधेनाकर्षकश्छायाग्रहइत्युच्यते ३४ तदे

तस्यान्वयेबभूवासौरामोदाशरथिःप्रभुः तस्यकार्यार्थसिद्ध्यर्थंगच्छत्येषमहाकपिः २८ त्वमुत्तिष्ठ जलात्तूर्णंत्वयिविश्राम्यगच्छतु सतथेतिप्रादुरभूज्जलमध्यान्महोन्नतः २९ नानामणिमयैःशृं गैस्तस्योपरिनराकृतिः प्राहयांतंहनूमंतंमैनाकोहंमहाकपे ३० समुद्रेणसमादिष्टस्त्वद्विश्रामायमा रुते आगच्छामृतकल्पानिजग्ध्वापक्वफलानिमे ३१ विश्राम्यात्रक्षणंपश्चाद्गमिष्यसियथासुखम् एवमुक्तोथतंप्राहहनूमान्मारुतात्मजः ३२ गच्छतोरामकार्यार्थंभक्षणंमेकथंभवेत् विश्रामोवाक थंमेस्याद्गंतव्यंत्वरितंमया ३३ इत्युक्त्वास्पृष्टशिखरःकराग्रेणययौकपिः किंचिद्दूरंगतस्यास्यछायां छायाग्रहोग्रहीत् ३४ सिंहिकानामसाघोराजलमध्येस्थितासदा आकाशगामिनांछायामाक्रम्या कृष्यभक्षयेत् ३५ तयागृहीतोहनुमांश्चिंतयामाससवीर्यवान् केनेदंमेकृतंवेगरोधनंविघ्नकारिणा ३६ दृश्यतेनैवकोप्यत्रविस्मयोमेप्रजायते एवंविचिंत्यहनुमानधोदृष्टिंप्रसारयन् ३७ तत्रदृष्ट्वा महाकायांसिंहिकांघोररूपिणीम् पपातसलिलेतूर्णंपद्भ्यामेवाहनद्रुषा ३८ पुनरुत्प्लुत्यहनु मान्दक्षिणाभिमुखोययौ ततोदक्षिणमासाद्यकूलंनानाफलद्रुमम् ३९ नानापक्षिमृगाकीर्णंनाना पुष्पलतावृतम् ततोददर्शनगरंत्रिकूटाचलमूर्धनि ४० प्राकारैर्बहुभिर्युक्तंपरिखाभिश्चसर्वतः प्रवेक्ष्यामिकथंलंकामितिचिंतापरोभवत् ४१

वाह सिंहिकेति भक्षयतिइत्यर्थेआर्षः ३५ ३६ विस्मयआश्चर्यंयत्कु स्याप्यदर्शनंवेगरोधश्चेत्याश्चर्यं प्रसारयत् प्रसारयतअडभावआर्षः ३७ सिंहिकां तन्नाम्नींराक्षसीं ३८ दक्षिणंकूलंसागरस्येतिशे षः ३९ ४० बहुभिःप्राकारैःअंतर्दुर्गमध्यदुर्गबहिर्दुर्गसंबंधिभिः परिखाः प्राकारबहिर्गताः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेक्ष्याभिप्रवेक्ष्यामिसूक्ष्मःसूक्ष्मशरीरोऽष्णूत्वेत्यर्थः लंकांजगामरात्राविति शेषः ४२ सूक्ष्मंवपुर्धृत्वाद्वारंप्रविवेश ४३ ४४ रात्रौचोर वत्प्रविश्यगच्छसीतिशेषः सलंकइत्येकः किंभवानित्यादिप्रश्नानंतरम् ४५ ४६ ४७ अष्टाविंशातिपर्यायेइति यद्यपिअन्यत्रच तुर्विंशातिमेपर्यायेत्रेतायांरामावतारोऽष्टाविंशतिमेपर्यायेद्वापरांतेकृष्णावतारइत्युक्तंतथापिकल्पांतरपरतयाविरोधपरिहारोब

रात्रौप्रवेक्ष्यामिसूक्ष्मोहंलंकांरावणपालिताम् एवंविचिंत्यतत्रैवस्थित्वालंकांजगामसः ४२ धृत्वासूक्ष्मं वपुर्द्वारंप्रविवेशप्रतापवान् तत्रलंकापुरीसाक्षाद्राक्षसीवेषधारिणी ४३ प्रविशंतंहनूमंतंदृष्ट्वालंका व्यतर्जयत् कस्त्वंवानररूपेणमामनादृत्यलंकिनीम् ४४ प्रविश्यचोरवद्रात्रौकिंभवान्कर्तुमिच्छति इत्युक्त्वारोषताम्राक्षीपादेनाभिजघानतम् ४५ हनुमानपितांवाममुष्टिनावज्ञयाहनत् तदैवपतिता भूमौरक्तमुद्वमतीभृशम् ४६ उत्थायप्राहसालंकाहनूमंतंमहाबलम् हनुमन्गच्छभद्रंतेजितालंका त्वयानघ ४७ पुराहंब्रह्मणाप्रोक्ताह्यष्टाविंशतिपर्यये त्रेतायुगेदाशरथीरामोनारायणोव्ययः ४८ ज निष्यतेयोगमायासीताजनकवेश्मनि भूभारहरणार्थायप्रार्थितोयंमयाक्वचित् ४९ सभार्योराघ वोभ्रात्रागमिष्यतिमहावनम् तत्रसीतांमहामायांरावणोपहरिष्यति ५० पश्चाद्रामेणसाचिव्यंसु ग्रीवस्यभविष्यति सुग्रीवोजानकींद्रष्टुंवानरान्प्रेषयिष्यति ५१ तत्रैकोवानरोरात्रावागमिष्यतितें तिकम् त्वयाचभर्त्सितःसोपित्वांहनिष्यतिमुष्टिना ५२ तेनाहतात्वंव्यथिताभविष्यसियदानघे तदैवरावणस्यांतोभविष्यतिनसंशयः ५३ तस्मात्त्वयाजितालंकाजितंसर्वंत्वयानघ रावणांतःपुरवरेक्रीडाकाननमुत्तमम् ५४ तन्मध्येशोकवनिकादिव्यपादपसंकुला अस्तितस्यांमहावृक्षःशिंशापानाममध्यगः ५५

सेयः ४८ योगमायाचसीतेतिजनिष्यतेइत्यन्वयः क्वचित् अवतारपूर्वकालेप्रार्थितोजनिष्यतेइत्यन्वयः ४९ ५० साचिव्यंस ख्यम् ५१ ५२ ५३ यतस्त्वयाहंलंकाजितातस्मात्त्वयासर्वराक्षसकुलंजितम् अथसीतास्थितिस्थानमाहरावणांतःपुरेति ५४ ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५६ यतोमेराघवस्मृतिरासीदतोहमपिधन्यातद्भक्तसंगस्यापिदुर्लभत्वंकिंवक्तव्य मितिभावः प्रसीदत्तांप्रसन्नः सआस्ताम्
५७ पुस्फोरस्फुरितमभवत् भुजोवामएवस्त्रियावामांगस्फुरणंशुभसूचकंपुंसोशुभदमितिभावः अतींद्रियस्यइंद्रियावि
षयस्यरामस्यदक्षांगंपुस्फोर यद्वारामसंबंधि अतींद्रियंग्रसंयदिंद्रियंतस्यदक्षांगंदक्षिणभागःपुस्फोरतत्स्फुरणंचस्त्री-

तत्रास्तेजानकीघोरराक्षसीभिःसुरक्षिता दृष्ट्वैवगच्छत्वरितंराघवायनिवेदय ५६ धन्याहमप्यद्य
चिरायराघवस्मृतिर्ममासीद्भवपाशमोचनी तद्भक्तसंगोप्यतिदुर्लभोममप्रसीदतांदाशरथिःसदाह्
दि ५७ उल्लंघयिष्यंतमब्धिंपवनात्मजेनधरासुतायाश्चदशाननस्य पुस्फोरवामाक्षिभुजश्चतीव्रंरामस्य
दक्षांगमतींद्रियस्य ५८ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुंदरकांडेप्रथमःसर्गः १ त
तोजगामहनुमान्लंकांपरमशोभनाम् रात्रौसूक्ष्मतनुर्भूत्वाबभ्रामपरितःपुरीम् १ सीतान्वेषण
कार्यार्थीप्रविवेशनृपालयम् तत्रसर्वप्रदेशेषुविविच्यहनुमान्कपिः २ नापश्यज्जानकींस्मृत्वाततोलं-
काभिभाषितम् जगामहनुमान्छीघ्रमशोकवनिकांशुभाम् ३ सुरपादपसंबाधांरत्नसोपानवापिका
म् नानापक्षिमृगाकीर्णांस्वर्णप्रासादशोभिताम् ४ फलैरानम्रशाखाग्रपादपैःपरिवारिताम् विचिन्वन्
जानकींतत्रप्रतिवृक्षंमरुत्सुतः ५ ददर्शाभ्रंलिहंतत्रचैत्यप्रासादमुत्तमम् दृष्ट्वाविस्मयमापन्नोमणिस्तं
भशतान्वितम् ६ समतीत्यपुनर्गत्वाकिंचिद्दूरंसमारुतिः ददर्शशिंशपावृक्षमत्यंतनिबिडच्छदम् ७
अदृष्टातपमाकीर्णस्वर्णवर्णविहंगमम् तन्मूलेराक्षसीमध्येस्थितांजनकनंदिनीम् ८
लाभसूचकंपुंसामि
त्याहुः ५८ इति० सुं० कां० प्र० स० १ ततइतिसूक्ष्मतनुःसूक्ष्मवानररूपः १ सीतान्वेषणकार्यार्थीसीतान्वेषणरूपकार्येच्छावान् विविच्यदृष्ट्वा
२ ततोलंकावाक्यंस्मृत्वाहनूमान्छीघ्रंजगाम ३ सुरपादपाःकल्पवृक्षादयः ४ फलैरानम्राणिशाखाग्राणियेषांतैःपादपैः ५ अभ्रंलिहमत्यु
च्चंचैत्यंप्रासादंदेवतास्थानविशेषं अत्युच्चत्वान्मणिस्तंभादियुतत्वाच्चविस्मयं ६ समतीत्येतिचैत्यप्रासादमितिशेषः ७ अत्यंतनिबिडपत्र
त्वादेवादृष्ट आतपोयत्रजनैस्तं स्वर्णवर्णविहंगमैः पक्षिभिराकीर्णंव्याप्तमित्यर्थःमयूरव्यंसकादित्वात्समासः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकवेणीहरणदिनावधिसंस्काररहितामित्यर्थः यद्वाशोभार्थमन्यदावेणीत्रयसंबंधः पुरतोद्वयंपश्चादेकेतिसंप्रति तुसंस्कारग
हित्यात्पृष्ठलंबिनीएकैवेत्यर्थः दीनांस्वजनविरहाद्दीनामिवशोचंतींआत्मानमितिशेषः ९ १० शाखानामंतेप्रांतेयेच्छदाःपत्राणि
तेषांमध्यस्थः तद्दर्शनजानंदाभिनयः कृतार्थइत्यादि ११ १२ किमेतत् किंजन्योयंशब्दः १३ अलीयतव्तदर्शनेनकरि
ष्यमाणकार्यभंगभियेति भावः १४ १५ इत्येवंचिंतयन्रावणोराघवेणेतिश्लोकोक्तंचिंतयन्नित्यम् सदाहृदिराममेवध्यायन्वा

ददर्शहनुमान्वीरोदेवतामिवभूतले एकवेणींकृशांदीनांमलिनांबरधारिणीम् ९ भूमौशयानांशोचंतीं
रामरामेतिभाषिणीम् त्रातारंनाधिगच्छंतीमुपवासकृशांशुभाम् १० शाखांतच्छदमध्यस्थोददर्श
कपिकुंजरः कृतार्थोहंकृतार्थोहंदृष्ट्वाजनकनंदिनीम् ११ मयैवसाधितंकार्यंरामस्यपरमात्मनः ततः
किलकिलाशब्दोबभूवांतःपुराद्बहिः १२ किमेतदितिसंलीनोवृक्षपत्रेषुमारुतिः आयांतंरावणंतत्रस्त्री·
जनैःपरिवारितम् १३ दशास्यंविंशतिभुजंनीलांजनचयोपमम् दृष्ट्वाविस्मयमापन्नोपत्रखंडेष्वली
यत १४ रावणोराघवेणाशुमरणंमेकथंभवेत् सीतार्थमपिनायातिरामःकिंकारणंभवेत् १५ इत्येवं
चिंतयन्नित्यंराममेवसदाहृदि तस्मिन्दिनेपररात्रौरावणोराक्षसाधिपः १६ स्वप्नेरामेणसंदिष्टःक
श्चिदागत्यवानरः कामरूपधरःसूक्ष्मोवृक्षाग्रस्थोनुपश्यति १७ इतिदृष्ट्वाद्भुतस्वप्नंस्वात्मन्येवानुचिंत्य
सः स्वप्नःकदाचित्सत्यःस्यादेवंतत्रकरोम्यहम् १८ जानकींवाक्शरैर्विध्यदुःखितांनितरामहं करोमि
दृष्ट्वारामायनिवेदयतुवानरः १९

स्त्वइतिशेषः अतस्तस्मिन्दिनेपररात्रौहनूमत्प्रवेशदिनरात्रिंसंबध्यपररात्रेइत्यर्थःसमा
सांताभावस्तदनित्यत्वात् १६ स्वप्नेनिद्रासमयेरामादिष्टः कश्चिद्वानरोलंकामागत्यवृक्षाग्रस्थोनुपश्यतिसीतामितिशेषः १७ इति
अद्भुतंस्वप्नंदृष्ट्वाअयंस्वप्नःकदाचित्सत्योभवेत् अतस्तत्रसीतासमीपंगत्वाएवंकरोमीति अचिंतयदितिशेषः १८ यदचिंतयत्तदाह
जानकीमितिविध्येति ल्यबार्षः तांवाक्शरैर्विध्यनितरांदुःखितांकरोमितदृष्ट्वावानरोरामायनिवेदयतुएवंहिरामःशीघ्रंआगच्छेदितिभा
वः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नूपुराणिपादभूषणानिकिंकिण्योजघ नभूषणानिसिंजितंशब्दं २० भीतासीतारूपांगनास्वात्मन्येवस्वशरीरेएवलीयमानास्थितेत्यन्वयः सा
मेर्पितंस्थापितमंतरंचित्तंयया २१ किमाह तदाहस्रूमध्यमेइत्यादि २२ लोकाः चाररूपाःप्रयत्नेनसमंततो वीक्ष्यमाणाअपिरामंनपश्यं
ति २४ त्वयिनिस्पृहेणइच्छाहीनेनपूर्णकामत्वादित्यांतरोर्थः त्वयासदालिंगितोपिध्यानेनसदाहृदिचिंतनात् अतएवसमीपस्थोपिषद्रा
शक्तिशक्तिमनोरभेदात्सदालिंगितोविभक्तत्वाच्चसमीपस्थोयद्यपि २५ तथाप्यस्यरामस्यहृदयेत्वयित्वद्विषयेस्नेहोनजायते अतएवेयत्का
लंतदुपेक्षातस्येतिभावः सर्वत्रसमत्वात्तस्यनकापिस्नेह इतितत्वं किंचत्वत्कृतान्सर्वभोगांस्त्वयास्ववृत्तिद्वारोपनीतान्सर्वभोगान्सर्ववि

इत्येवंचिंतयन्सीतासमीपमगमद्द्रुतम् नूपुराणांकिंकिणीनांश्रुत्वासिंजितमंगना २० सीताभीतालीयमा
नास्वात्मन्येवस्रूमध्यमा अधोमुख्यश्रुनयनास्थितारामार्पितांतरा २१रावणोपितदासीतामालोक्याहस्रुम
ध्यमे मांदृष्ट्वाकिंवृथासुभ्रुस्वात्मन्येवविलीयसे २२ रामोवनचराणांहिमध्येतिष्ठतिसानुजः कदाचिद्दृश्य
तेकैश्चित्कदाचिन्नैवदृश्यते २३ मयातुबहुधालोकाःप्रेषितास्तस्यदर्शने नपश्यंतिप्रयत्नेनवीक्ष्यमा
णाःसमंततः २४ किंकरिष्यसिरामेणानिस्पृहेणसदात्वयि त्वयासदालिंगितोपिसमीपस्थोपिसर्वदा
२५ हृदयेस्यनचस्नेहस्त्वयिरामस्यजायते त्वत्कृतान्सर्वभोगांश्चत्वद्गुणानपिराघवः २६ भुंजानोपि
नजानातिकृतघ्नोनिर्गुणोधमः त्वमानीतामयासाध्वीदुःखशोकसमाकुला २७ इदानीमपिनायातिभ
क्तिहीनःकथंव्रजेत् निःसत्वोनिर्ममोमानीमूढःपंडितमानवान् २८ नराधमंत्वद्विमुखंकिंकरिष्यसि
भामिनि त्वय्यतीवसमासक्तंमांभजस्वासुरोत्तमम् २९

षयान्तथात्वद्गुणान्सुखसंकल्पकामादीन्भुंजानोपिअहंभो
केतिनजानातितथाभिमानराहित्यात् अतएवकृतघ्नः अतएवनिर्गुणः योहिगुणवान्सउपकारंमनुतएव अधमःउपकारविस्मरणात्
किंचनधमतिशब्दविषयोभवतीत्यधमशब्दवाच्यइतियावत्कृतघ्नत्वाद्युपपादयन्तित्वमिति २६,२७ यतस्त्वयिभक्तिहीनोतःकथंव्रजेत्तस्य
स्थानतस्त्वत्परित्राणार्थमिदंदेशमित्यर्थः निःसत्वोनिर्बलःनिर्ममोममताहीनः त्वयिइयंममेतिबुद्धिहीनः २८ नराधमंपंचम्यर्थेबहुव्रीहि
रितिकश्चित् किंकरिष्यसिताद्दृशेनरागेणकिंप्रयोजनमित्यर्थः असुरोत्तममितिनराधमव्यतिरेकउक्तः २९ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवगंधर्वनागानांतद्योषितामित्यर्थः नियोक्त्रीप्रस्तुतयाआज्ञापयित्रीप्रतिपद्यसेअंगीकरोषि ३० निधायतृणमंतरेपतिव्रतायाःसाक्षात्प
रपुरुषेणवार्तालापस्यानौचित्यादितिभावः त्वंचतृणतुल्यइत्यपिद्योतयितुंच ३१ शनैर्वैरूपमयाअत्यंतपराक्रमराहित्यंसूचितम्
३२ अचिरादित्यच्छेदः अल्पेनैवकालेनेत्यर्थः यदारामशराघातैर्विदारितवपुर्भवान्भविष्यतीतिशेषः ३३ तदारामंमानुषंज्ञास्यसि
यमांतिकंत्वगमिष्यसिशरैःसमुद्रंशोषयित्वावाअथवाअथवावारिधिंबध्वासेतुबंधेनेतिशेषः ३४ तदागमनंचत्वमनुपदमेवद्रक्ष्यसेइत्य

देवगंधर्वनागानांयक्षकिंनरयोषिताम् भविष्यसिनियोक्त्रीत्वंयदिमांप्रतिपद्यसे ३० रावणस्यवचःश्रु
त्वासीतामर्षसमन्विता उवाचाधोमुखीभूत्वानिधायतृणमंतरे ३१ राघवाद्विभ्यतानूनंभिक्षुरूपेणया
धृतम् रहितेराघवाभ्यांत्वंशुनीवहविरध्वरे ३२ हृतवानसिमांनीचतत्फलंप्राप्स्यसेचिरात् यदारामश
राघातविदारितवपुर्भवान् ३३ ज्ञास्यसेमानुषंरामंगमिष्यसियमांतिकम् समुद्रंशोषयित्वावाशरै
र्बध्वाथवारिधिम् ३४ हंतुंत्वांसमरेरामोलक्ष्मणेनसमन्वितः आगमिष्यत्यसंदेहाद्द्रक्ष्यसेराक्षसाधम
३५ त्वांसपुत्रंसहबलंहत्वानेष्यतिमांपुरम् श्रुत्वारक्षःपतिःक्रुद्धोजानक्याःपरुषाक्षरम् ३६ वाक्यं
क्रोधसमाविष्टःखड्गमुद्यम्यसत्वरः हंतुंजनकराजस्यतनयांताम्रलोचनः ३७ मंदोदरीनिवार्याहपतिं
पतिहितेरता त्यजेनांमानुषींदीनांदुःखितांकृपणांकृशाम् ३८ देवगंधर्वनागानांबह्व्यःसंतिवरांगनाः
त्वामेववरयंत्यद्यमदमत्तविलोचनाः ३९ ततोऽब्रवीद्दशग्रीवोराक्षसीर्विकृताननाः यथामेवशगासीता
भविष्यतिसकामना तथायतध्वंत्वरितंतर्जनादरणादिभिः ४० द्विमासाभ्यंतरेसीतायदिमेवशगा
भवेत् तदासर्वसुखोपेताराज्यंभोक्ष्यतिसामया ४१

न्वयः ३५ जानक्याःपरुषाक्षरंवाक्यंश्रुत्वाक्रुद्धोभवदिति
शेषः ३६ ततःक्रोधसमाविष्टःखड्गमुद्यम्यजनकराजतनयांहंतुमुद्यतोऽभवदितिशेषः ३६ अन्यानुरक्तत्वात्तद्वियोगाच्चदैन्यादिविशिष्टाम् ३८
यात्वामेववरयंतिताबह्व्यःसंतीतियोजनामदेनकाममदेनमत्तेमदयुक्तेइवविलोचनेयासांताः ३९ सकामनामद्विषयकामनासहितास
तीयथामेवशगाभविष्यतितथात्वरयायतध्वमित्यन्वयः तर्जनंभीषणंआदरणंसांत्वम् ४० ४१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुरुतपक्वांकुरुतेत्यर्थः ४२ स्वतर्जनैः स्वबुद्धिकल्पितभीषणोपायैः स्वकैर्यथायोग्यैर्वा ४३ इदंसालस्याप्युपलक्षणंतदेवाह तत्रैके-
ति ५४ भीषणान्याह अपराचेति किंविलंबेन अस्यावधेइतिशेषः जानकींइदानीमेवछेद्यतांअस्याअंगंपृथक्पृथक्विभज्यपा
च्यतामितिशेषः ४५ ४६ ४७ मद्वाक्यंशृणुध्वंयच्छ्रुतंसद्योहितंभवेत् ४८ वाक्यमाहनेति इदानीमेवमेमयारामःस्वप्नेदृष्टइत्यन्वयः
कथंदृष्टस्तदाह आरुह्येतिसमागतःसंयुक्तः ५० स्वांकेजानकीमारोप्य अगस्त्यपर्वतस्यमूर्धनिऊर्ध्वभागेस्थितोदृष्टः एवंरामविषयं

यदिमासद्वयादूर्ध्वंमच्छय्यांनाभिनंदति तदामेप्रातराशायहत्वाकुरुतमानुषीम् ४२ इत्युक्त्वाप्रययौस्त्री
भीरावणोंतःपुरालयम् राक्षस्योजानकीमेत्यभीषयंतःस्वतर्जनैः ४३ तत्रैकाजानकीमाहयौवनंतेदृ
थागतम् रावणेनसमासाद्यसफलंतुभविष्यति ४४ अपराचाहकोपेनकिंविलंबेनजानकीम् इदानीं
छेद्यतामंगंविभज्यचपृथक्पृथक् ४५ अन्यातुखड्गमुद्यम्यजानकींहंतुमुद्यता अन्याकरालवदनाविः
दार्यास्यमभीषयत् ४६ एवंतांभीषयंतीस्ताराक्षसीर्विकृताननाः निवार्यत्रिजटावृद्धाराक्षसीवाक्य
मब्रवीत् ४७ शृणुध्वंदुष्टराक्षस्योमद्वाक्यंवोहितंभवेत् ४८ नभीषयध्वंरुदतींनमस्कुरुतजानकीम्
इदानीमेवमेस्वप्नेरामःकमललोचनः ४९ आरुह्यैरावतंशुभ्रंलक्ष्मणेनसमागतः दग्ध्वालंकांपुरींसर्वां
हत्वारावणमाहवे ५० आरोप्यजानकींस्वांकेस्थितोदृष्टोगमूर्द्धनि रावणोगोमयन्हृदेतैलाभ्यक्तोदिगंबरः
५१ अगाहत्पुत्रपौत्रैश्चकृत्वावदनमालिकाम् बिभीषणस्तुरामस्यसन्निधौहृष्टमानसः ५२ सेवांकरोति
रामस्यपादयोर्भक्तिसंयुतः सर्वथारावणंरामोहत्वासकुलमंजसा ५३ बिभीषणायाधिपत्यंदत्वासीतां
शुभाननाम् अंकेनिधायस्वपुरींगमिष्यतिनसंशयः ५४ त्रिजटायावचःश्रुत्वाभीतास्ताराक्षसस्त्रि
यः तूष्णीमासंस्तत्रतत्रनिद्रावशमुपागताः ५५

शुभस्वप्नमुक्त्वारावणविषयमनिष्टस्वप्नमाह रावणइति ५१ वदनमालिकांस्वमुंडमालांस्वहस्तेनकृत्वागाहदित्यर्थः नन्वेवंकिंलंकाराक्ष
सैवभविष्यतीत्याशंक्यनेत्याह बिभीषणइति रामस्यसेवांकरोतिएवंविधःस्वप्नेदृष्टोनःसोत्रराज्यंकर्तेत्याह सर्वथेत्यादि ५२ ५३ ५४ ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रातारमप्राप्नुवतीदुःखेनमूर्च्छितेवाश्रुपूर्णनेत्राचिंतयंतीदमात्मनासहाब्रवीत् ५६ ५७ मृतौकृतनिश्चयामरणस्यकंचिदुपायंकमप्युपायमजानती
शाखामालंब्यचिरायातिष्ठदितिशेषः ५८ इतिश्रीमत्सक॰ सुंदरकांडेद्वितीयःसर्गः २ ततस्तदुपायंनिश्चित्याहोद्बंधनेनवेति १ उद्बंधनसाधन
माह दीर्घवेणीति अथानंतरंएवंमरणायनिश्चितबुद्धिंजानकींविलोक्येत्यन्वयः २ किंचिद्विचार्य अयंवचनावसरइतिनिश्चित्य

तर्जितारा़क्षसीभिःसासीताभीतातिविह्वला त्रातारंनाधिगच्छंतीदुःखेनपरिमूर्च्छिता ५६ अश्रुभिः
पूर्णनयनाचिंतयंतीदमब्रवीत् प्रभातेभक्षयिष्यंतिराक्षस्योमांनसंशयः ५७ इदानीमेवमरणंकेनो·
पायेनमेभवेत् ५७ एवंस्रुदुःखेनपरिप्लुतासाविमुक्तकंठरुदतीचिराय आलंब्यशाखांकृतनिश्चयामृ
तौनजानतीकंचिदुपायमंगना ५८ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुंदरकांडेद्वितीयःस॰
श्रीमहादेवउवाच उद्बंधनेनवामोक्ष्येशरीरंराघवंविना जीवितेनफलंकिंस्यान्ममरक्षोधिमध्यतः १ दी
र्घवेणीममात्यर्थमुद्बंधायभविष्यति एवंनिश्चितबुद्धिंतांमरणायाथजानकीम् २ विलोक्यहनुमान्किं·
चिद्विचार्यैतदभाषत शनैःशनैःसूक्ष्मरूपोजानक्याःश्रोत्रगंवचः ३ इक्ष्वाकुवंशसंभूतोराजादशरथोम
हान् अयोध्याधिपतिस्तस्यचत्वारोलोकविश्रुताः ४ पुत्रादेवसमाःसर्वेलक्षणैरुपलक्षिताः राम
श्चलक्ष्मणश्चैवभरतश्चैवशत्रुहा ५ ज्येष्ठोरामःपितुर्वाक्याद्दंडकारण्यमागतः लक्ष्मणेनसहभ्रात्रा
सीतयाभार्ययासह ६ उवासगौतमीतीरेपंचवट्यांमहामनाः तत्रनीतामहाभागासीताजनकनंदिनी ७

सूक्ष्मरूपःसन् जानक्यास्तस्याएवश्रोत्रगंयथाभवतितथाशनैःशनैरभाषतेत्यन्वयः ३ तद्वच आह इक्ष्वाकिति ४ लक्षणैःसा
मुद्रिकोक्तोत्तमलक्षणैः शत्रुहाशत्रुघ्नाख्यइत्यर्थः ५ ६ रावणेननीतेत्यन्वयः ७ श्रीसीतारामचंद्राभ्यांनमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रहितेरामचंद्रेथरावणेनदुरात्मना॥ ततोरामोतिदुःखार्तोमार्गमाणोथजानकीं॥८॥ जटायुषंपक्षिरा-
जमपश्यत्पतितंभुवि॥ तस्मैदत्वादिवंशीघ्रंऋष्यमूकमुपागमत्॥९॥ सुग्रीवेणकृतोमैत्रीरामस्यविदि
तात्मनः॥ तद्भार्यापहारिणंहत्वावालिनंरघुनंदनः॥१०॥ राज्येभिषेच्यसुग्रीवंमित्रकार्यंचकारसः॥ सुग्रीव-
स्तुसमानाय्यवानरान्वानरप्रभुः॥११॥ प्रेषयामासपर्वतोवानरान्परिमार्गणे॥ सीतायास्तत्रनैकोहंसुग्रीवस-
चिवोहरिः॥१२॥ संपातिवचनाच्छीघ्रंउल्लंघ्यशतयोजनं॥ समुद्रंनगरींलंकांविचिन्वन्जानकींशुभां॥१३॥
शनैरशोकवनिकांविचिन्वन्शिंशपातरुम्॥ अद्राक्षंजानकींतत्रशोचंतींदुःखसंप्लुतां॥१४॥ रामस्यमहिषींदे-
वीकृतकृत्योहमागतः॥ इत्युक्त्वापररामायमारुतिर्बुद्धिमत्तरः॥१५॥ सीताक्रमेणतत्सर्वंश्रुत्वाविस्मयमाययौ
॥ किमिदंमेश्रुतंत्योपिवायुनासमुदीरितं॥१६॥ स्वप्नोवामेमनोभ्रांतिर्यदिवासत्समेवतत्॥ निद्रामेनास्तिदुःखे-
नजानामिततःकुतोभ्रमः॥१७॥ येनमेकर्णपीयूषंवचनंसमुदीरितं॥ सदृश्यतांमहाभागःप्रियवादीममाग्रतः॥
॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छ्रुत्वाजानकीवाक्यंहनुमानूपन्नखंडन:॥ अवतीर्यशिंशेनेसीतापुरत:स्थित:॥१९॥ कलविंकप्रमाणांगोरक्ता:-
स्य:पीतवानर:॥ ननामशिरसैकै:सीतांसांजलि:पुरत:स्थित:॥२०॥ दृष्ट्वातंजानकीभीतारावणोयमुपागत:॥मां
मोहयितुमायातोमाययावानराकृति:॥२१॥ इत्येवंचिंतयित्वासातूष्णीमासदधोमुखी॥ पुनरप्याहतांसीतांदेवियत्वंविशं
कसे॥२२॥ नाहंतथाविधोमातस्त्यजशंकांमयिस्थितां॥ दासोहंकोसलेंद्रस्यरामस्यपरमात्मन:॥२३॥सचिवोहंह-
रींद्रस्यसुग्रीवस्यशुभप्रदे॥ वायो:पुत्रोहमखिलप्राणभूतस्यशोभने॥२४॥तच्छ्रुत्वाजानकीप्राहहनूमंतंकृतांज-
लिं॥ वानराणांमनुष्याणांसंगतिर्घटतेकथं॥२५॥ यथात्वंरामचंद्रस्यदासोहमितिभाषसे॥ तामाहमारुति:प्रीतो
जानकींपुरत:स्थित:॥२६॥ ऋष्यमूकमगात्रामःशबर्यानोदित:सुधी:॥ सुग्रीवोऋष्यमूकस्थोदृष्टवान्राम
लक्ष्मणौ॥२७ भीतोमांप्रेषयामासज्ञातुंरामस्यहृद्गतं॥ ब्रह्मचारिवपुर्धृत्वागतोहंरामसन्निधिं॥२८॥ ज्ञात्वारा-
मस्यसद्भावंस्कंधोपरिनिधायतौ॥ नीत्वासुग्रीवसामीप्यंसख्यंचाकरवंतयो:॥२९॥ सुग्रीवस्यहृताभार्यावालिनास-
धूत्तम:॥ जघानैकेनबाणेनततोराज्येभ्यषेचयत्॥३०॥ सुग्रीवंवानराणांसप्रेषयामासवानरान्॥ दिग्भ्योमहाबला-
न्वीरान्भवत्या:परिमार्गणे॥३१॥ गच्छंतंराघवोदृष्ट्वामामभाषतसादरं॥त्वयिकार्यमशेषंमेस्थितंमारुतनंदन॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रूहि मे कुशलं सर्वं सीतायै लक्ष्मणस्य च ॥ ३३ ॥ अंगुलीयकमेतन्मे परिज्ञानार्थमुत्तमम् ॥ सीतायै दीयतां सा-
धु मन्नामाक्षरमुद्रितं ॥ ३४ ॥ इत्युक्त्वा प्रददौ मह्यं कराग्रादंगुलीयकं ॥ प्रयत्नेन मयानीतं देवि पश्यांगुलीयकं ॥
॥ ३५ ॥ इत्युक्त्वा प्रददौ देव्यै मुद्रिकां मारुतात्मजः ॥ नमस्कृत्वा स्थितो दूराद्बद्धांजलिपुटो हरिः ॥ ३६ ॥ दृष्ट्वा सी-
ता प्रमुदिता रामनामांकितां तदा ॥ मुद्रिकां शिरसा धृत्वा स्रवदानंदनेत्रजा ॥ ३७ ॥ कपे मे प्राणदाता त्वं
बुद्धिमानसि राघवे ॥ भक्तोऽसि प्रियकारी त्वं विश्वासोऽस्ति तवैव हि ॥ ३८ ॥ नो चेन्मत्संनिधिं चान्यं पु-
रुषं प्रेषयेत्कथं ॥ हनुमन् दृष्टमखिलं मम दुःखादिकं त्वया ॥ ३९ ॥ सर्वं कथय रामाय यथा मे जायते दया ॥ मास-
द्वयावधिः प्राणास्थास्यंति मम सत्तम ॥ ४० ॥ नागमिष्यति चेद्रामो भक्षयिष्यति मां खलः ॥ अतः शीघ्रं क-
ण पींद्रेण सुग्रीवेण समन्वितः ॥ ४१ वानरानीकपैः सार्द्धं हत्वा रावणमाहवे ॥ सपुत्रं सबलं रामो यदि मां मोचयेत्प्र-
भुः ॥ ४२ तत्तस्य सदृशं वीर्यं वीरवीर्यं वर्णितं ॥ यथा मां तारयेद्रामो हत्वा शीघ्रं दशाननं ॥ ४३ ॥ तथा यतस्व हनु- वर्णय
मन्वाचा धर्ममवाप्नुहि ॥ हनुमानपि तामाह देवि दृष्टो यथा मया ॥ ४४ ॥ रामः सलक्ष्मणः शीघ्रमागमिष्य-
न तिसायुधः ॥ सुग्रीवेण ससैन्येन हत्वा दशमुखं बलात् ॥ ४५ ॥ समानेष्यति देवि त्वामयोध्यां नात्र संशयः
॥ तमाह जानकी रामः कथं वारिधिमाततं ॥ ४६ ॥ तीर्त्वायास्यत्यमेयात्मा वानरानीकपैः सह ॥ हनुमानाह मे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कंधावारुह्यपुरुषर्षभौ ॥४७॥ आयस्यतः ससैन्यश्च सुग्रीवो वानरेश्वरः ॥ विहायसा क्षणेनैने
वतीर्यवारिधिमाततम् ॥४८॥ निर्दहिष्यति रक्षौघान् वल्कलेनात्र संशयः ॥ अनुज्ञां देहि मे देवि
गच्छामि त्वरयान्वितः ॥४९॥ द्रष्टुं रामं सह भ्रात्रा त्वरयामि नवांतिकम् ॥ देवि किंचिद भिज्ञा
नं देहि मे येन राघवः ॥५०॥ विश्वसेन्मां प्रयत्नेन ततो गंतास्म्युत्सुकः ॥ ततः किंचिद्विचार्याप
श्यसीता कमललोचना ॥५१॥ विमुच्य केशपाशांते स्थितं चूडामणिं ददौ ॥ अनेन विश्वसेद्रामस्त्वां
कपींद्र सलक्ष्मणः ॥५२॥ अभिज्ञानार्थमन्यच्च वदामि तव सुव्रत ॥५३॥ चित्रकूटगिरौ पूर्वमे
कदा रहसि स्थितः ॥ मदंके शिर आदाय निद्राति रघुनंदनः ॥५३॥ ऐंद्रः काकस्तदागत्य नखै
स्तुंडेन चासकृत् ॥ मत्पादांगुष्ठमारक्तं विदारयामिषाशया ॥५४॥ ततो रामः प्रबुध्याथ दृष्ट्वा पादं
कृतव्रणम् ॥ केन भद्रे कृतं चैतद्विप्रियं मे दुरात्मना ॥५५॥ इत्युक्त्वा पुरतोपश्यद्वायसं मां पुनः
पुनः ॥ अभिद्रवंतं रक्तास्यं नखैस्तुंडं चुकोपह ॥५६॥ श्रीराजाधिराजाय नमोस्तु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५७ ज्वलत्तत् अभिमंत्रितम् तृणंवायसमभ्यद्रवत् सवायसोऽपिभीतः लोकान् ऐंद्रब्रह्मांतान् भ्रमत्तत्रतैरपियदारक्षितुंशक्योनाभवत्तदा
५८ रामपदाग्रेपतत् ५९ ततःकाकोगतइतिशेषः एवंपौरुषवानपिसराघवः ६० इदानीमपिएवमवस्थायामपियदुपेक्षतेतत्किमर्थं ६१
जानाति वर्तमानसामीप्येलट् ज्ञास्यतीत्यर्थः ६२ यथात्वंसूक्ष्मवपुस्तथासर्वेपिवानराभवादृशाः भवद्वदेवसूक्ष्मवपुषइतिमहावपुर्भी
राक्षसैरूर्ध्वमसंभावितमित्यर्थः ६३ श्रुत्वातद्वचनंसीतायाइतिशेषः देव्यैसीतायै ६४ ६५ त्वांराक्षस्योद्रक्ष्यंति दृष्ट्वाचरावणंकथयिष्यंति

तृणमेकमुपादायदिव्यास्त्रेणाभियोज्यतत् चिक्षेपलीलयारामोवायसोपरितज्ज्वलत् ५७ अभ्य
द्रवद्वायसश्चभीतोलोकान्भ्रमत्पुनः इंद्रब्रह्मादिभिश्चापिनशक्योरक्षितुंतदा ५८ रामस्यपादयोर
ग्रेपतद्भीत्यादयानिधेः शरणागतमालोक्यरामस्तमिदमब्रवीत् ५९ अमोघमेतदस्त्रंमेदत्वैकाक्षमि
तोव्रज सव्यंदत्वाततःकाकएवंपौरुषवानपि ६० उपेक्षतेकिमर्थंमामिदानींसोपिराघवः हनूमानपिता·
माहश्रुत्वासीतानुभाषितम् ६१ देवित्वांयदिजानातिस्थितामत्ररघूत्तमः करिष्यतिक्षणाद्भस्मलंकारा
क्षससमंडिताम् ६२ जानकीप्राहतंवत्सकथंत्वंयोत्स्यसेसुरैः अतिसूक्ष्मवपुःसर्वेवानराश्चभवादृशाः ६३
श्रुत्वातद्वचनंदेव्यैपूर्वरूपमदर्शयत् मेरुमंदरसंकाशंरक्षोगणविभीषणम् ६४ दृष्ट्वासीताहनूमंतंम
हापर्वतसन्निभम् हर्षेणमहताविष्टाप्राहतंकपिकुंजरम् ६५ समर्थोसिमहासत्वद्रक्ष्यंतित्वांमहाबल
राक्षस्यस्तेशुभः पंथागच्छरामांतिकंद्रुतम् ६६ बुभुक्षितःकपिःप्राहदर्शनात्पारणंमम भविष्यति
फलैःसर्वैस्तवदृष्टेस्थितैर्हिमे ६७ तथेत्युक्तःसजानक्याभक्षयित्वाफलंकपिः ततःप्रस्थापितो
गच्छज्जानकींप्रणिपत्यसः किंचिद्दूरमथोगत्वास्वात्मन्येवानुचिंतयत् ६८

एवंसतिकोवेदकिंभावीत्याशयः अतोरामांतिकंद्रुतंगच्छतेपंथाःशुभोस्त्वितिशेषः ६६ कपिर्जानकींप्राहाहंबुभुक्षितोस्मि अतस्त
वदर्शनान्ममपारणमुचितमितिशेषः नन्वहंरिक्ताकेनत्वांपारयामीतिशंकायामाह तवदृष्टेस्थितैः फलैर्मेपारणाभविष्यतीत्य·
र्थः ६७ ततस्तयाप्रस्थापितोजानकींप्रणिपत्यागच्छत् अनुचिंतयत् अन्वचिंतयत् अडभावआर्षः ६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यत्किंचित् स्वाम्याज्ञप्तादधिकमुत्कृष्टंकर्मेत्यर्थः ६९ अन्यत्किंचित्वीरकर्म रावणंदृष्ट्वासंभाष्यचेत्यन्वयः ७० वृक्षखंडा-
न्वृक्षसमूहानउत्पाट्यनिर्वृक्षामकरोत् ७१ सीताश्रयनगंशिंशपारूपम् शून्यंवृक्षैरितिशेषः विपिनंवनवृक्षान् ७२ ७३ दुःख
शोकाभ्यांयुक्ताहमेनंनजानामि ७४ ७५ वानराकृतिर्देहइवत्वानरदेहंसदृशदेहइत्यर्थः वानरेएवंपराक्रमासंभवादेवमुक्तिःअ

कार्यार्थिमागतोदूतःस्वामिकार्याविरोधतः अन्यत्किंचिदसंपाद्यगच्छत्यधमएवसः ६९ अतोहंकिंचि
दन्यच्चकृत्वादृष्ट्वाथरावणम् संभाष्यचततोरामदर्शनार्थंव्रजाम्यहम् ७० इतिनिश्चित्यमनसावृक्ष
खंडान्महाबलः उत्पाट्याशोकवनिकांनिर्वृक्षामकरोत्क्षणात् ७१ सीताश्रयनगंत्यक्त्वावनंशून्यंचका
रसः उत्पाटयंतंविपिनंदृष्ट्वाराक्षसयोषितः ७२ अपृच्छन्जानकींकोसौवानराकृतिरुद्भटः ७३ जा
नक्युवाच भवत्यएवजानंतिमायांराक्षसनिर्मिताम् नाहमेनंविजानामिदुःखशोकसमाकुला ७४
इत्युक्तास्त्वरितंगत्वाराक्षस्योभयपीडिताः हनूमताकृतंसर्वंरावणायन्यवेदयन् ७५ देवकश्चिन्महा
सत्वोवानराकृतिर्देहभृत् सीतयासहसंभाष्यत्वशोकवनिकांक्षणात् उत्पाट्यचैत्यप्रासादंबभंजा
मितविक्रमः ७६ प्रासादरक्षिणःसर्वान्हत्वातत्रैवतस्थिवान् तच्छ्रुत्वातूर्णमुत्थायवनभंगमहाप्रियं
७७ किंकरान्प्रेषयामासनियुतंराक्षसाधिपः निर्भग्नचैत्यप्रासादप्रथमांतरसंस्थितः ७८ हनुमा
न्पर्वताकारोलोहस्तंभकृतायुधः किंचिल्लांगूलचलनोरक्तास्योभीषणाकृतिः ७९ आपतंतंमहा
संघंराक्षसानांददर्शसः चकारसिंहनादंचश्रुत्वातेमुमुहुर्भृशम् ८० हनूमंतमथोदृष्ट्वाराक्षसाभी
षणाकृतिम् निर्जघ्नुर्विविधास्त्रौघैःसर्वराक्षसघातिनम् ८१

शोकवनिकांक्षणादुत्पाट्यतैरेवचैत्यप्रासादंबभंज ७६ तस्थिवान्स्थितःमहाप्रियंमहच्चतदप्रियंचेत्यर्थः ७७ नियुतंदशकोट्यः निर्भग्नो
यश्चैत्यप्रासादस्तस्यप्रथमंयदंतरंप्रथमायाभूमिस्तत्रसंस्थितः ७८ लोहस्तंभएवकृतमायुधंयेनसः किंचिल्लांगूलचलनइतिस्वभावो
क्तिः ७९ तेकिंकरानामराक्षसाः ८० भीषणाकृतिंहनूमंतंदृष्ट्वेत्यन्वयः ८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुद्गरेणलोहस्तंभः ८२ ८३ सरावणः ८४ ८५ राक्षसान्रावणप्रेषणीयान् ८६ आकाशेप्रथममुत्पातस्तोगमनादवतरन्भूमिंमुद्ग
रेणाताडयत ८७ ८८ ८९ इंद्रजितंप्रतित्वंतंहंतुंगच्छेतिभंग्यंतरेणाह पुत्रेतिहत्वेत्युक्त्वाहंतुमशक्यत्वंविचार्याहबध्वावेति ९०दुः

ततउत्थायहनुमान्मुद्गरेणसमंततः निष्पिपेषक्षणादेवमशकानिवयूथपः ८२ निहतान्किंकरान्श्रुत्वा रावणःक्रोधमूर्छितः पंचसेनापतीस्तत्रप्रेषयामासदुर्मदान् ८३ हनूमानपितान्सर्वान्लोहस्तंभे नचाहनत् ततःक्रुद्धोमंत्रिसुतान्प्रेषयामाससप्तसः ८४ आगतानपितान्सर्वान्पूर्ववद्वानरेश्वरः क्षणान्निःशेषतोहत्वालोहस्तंभेनमारुतिः ८५ पूर्वस्थानमुपाश्रित्यप्रतीक्षन्राक्षसान्स्थितः ततो जगामबलवान्कुमारोक्षःप्रतापवान् ८६ तमुत्पातहनुमान्दृष्ट्वाकाशेसमुद्गरः गगनात्त्वरितोभू मिंमुद्गरेणव्यताडयत् ८७ हत्वातमक्षंनिःशेषंबलंसर्वंचकारसः ८८ ततःश्रुत्वाकुमारस्यवधं राक्षसपुंगवः क्रोधेनमहताविष्टइंद्रजेतारमब्रवीत् ८९ पुत्रगच्छाम्यहंतत्रयत्रास्तेपुत्रहारिपुः हत्वातमथवाबध्वाआनयिष्यामितेंतिकम् ९० इंद्रजित्पितरंप्राहत्यजशोकंमहामते मयिस्थि तेकिमर्थंत्वंभाषसेदुःखितंवचः ९१ बध्वानेष्येदुतंतातवानरंब्रह्मपाशतः इत्युक्त्वारथमारुह्य राक्षसैर्बहुभिर्वृतः ९२ जगामवायुपुत्रस्यसमीपंवीरविक्रमः ततोतिगर्जितंश्रुत्वास्तंभमुद्यम्य वीर्यवान् ९३ उत्पपातनभोदेशंगरुत्मानिवमारुतिः ततोभ्रमंतंनभसिहनूमंतंशिलीमुखैः ९४ विध्वातस्यशिरोभागंइषुभिश्चाष्टभिःपुनः हृदयंपादयुगलंषड्भिरेकेनवालधिम् ९५ भेदयि त्वाततोघोरंसिंहनादमथाकरोत् ततोतिहर्षाद्धनुमांस्तंभमुद्यम्यवीर्यवान् ९६ जघानसारथिं साश्वंरथंचाचूर्णयत्क्षणात् ततोन्यंरथमास्थायमेघनादोमहाबलः ९७

खितंवचः आज्ञाकर्तुरभावइवेतिभावः ९१ ब्रह्मपाशतः ब्रह्मास्त्राभिमंत्रितैःपाशैरित्यर्थः ९२ ९३ हनूमंतंशिलीमुखैर्विध्वासिंहना
दमकरोदित्यन्वयः ९४ विध्वेत्यस्यैवविवरणंशिरोभागमित्यादिभेदयित्वेत्यंतम् ९५ सिंहनादमकरोत् इंद्रजिदितिशेषः ९६ ९७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९८ यस्य रामस्य नाम ये प्राणिनो जपंति ते अज्ञानजन्यकर्मकृतं बंधनं संसारं परिमुच्य सद्य एव शिवाख्यं तत्पदं सच्चिदानंदाख्यं यांति ९९
तस्य रामस्य पदांबुजं ध्यात्वा मारुतिर्यतः सदैव निर्मुक्तानि समस्तानि बंधनानि कर्माणि यस्य तादृशो भवति अतस्तस्य पाशैः रितरैर्वा बंध
नैः किं दुःखमिति शेषः १०० इति श्रीम० सेतौ सुंदरकांडे तृतीयः सर्गः ३ धृतं सहस्तेन पाशबंधनं येन तादृशं विशेषेणाभी
तवत्तन्नगरं लंकां विलोकयंतं ईक्षितुं कपींद्रं द्रष्टुं तमेवानुपश्चाद्यांत इति पौर विशेषणम् १ क्षणमात्रसंगमं क्षणमात्रं संगमः स्वसं

शीघ्रं ब्रह्मास्त्रमादाय बध्वा वानरपुंगवम् विनायनिकटं राज्ञो रावणस्य महाबलः ९८ यस्य नाम
सततं जपंति येऽज्ञानकर्मकृतबंधनं क्षणात् सद्य एव परिमुच्य तत्पदं यांति कोटिरविभास्करं शिवं
९९ तस्यैव रामस्य पदांबुजं सदा हृत्पद्ममध्ये सुनिधाय मारुतिः सदैव निर्मुक्तसमस्तबंधनः किं त
स्य पाशैरितरैश्च बंधनैः १०० इति श्रीम० सुंदरकांडे तृतीयः सर्गः ३ श्रीमहादेव उवा०
यांतं कपींद्रं धृतपाशबंधनं विलोकयंतं नगरं विभीतवत् अताडयन्मुष्टितलैः सुकोपनाः पौराः स
मंतादनुयांत ईक्षितुम् १ ब्रह्मास्त्रमेनं क्षणमात्रसंगमं कृत्वा गतं ब्रह्मवरेण सत्वरम् ज्ञात्वा हनूमान
पि फल्गुरज्जुभिर्धृतो ययौ कार्यविशेषगौरवात् २ सभांतरस्थस्य च रावणस्य तं पुरो निधायाह बला
रिजित्तदा बद्धो मया ब्रह्मवरेण वानरः समागतो नेन हता महासुराः ३ यद्युक्तमत्रार्य विचार्य मं
त्रिभिर्विधीयतामेष न लौकिको हरिः ततो विलोक्याह स राक्षसेश्वरः प्रहस्तमग्रे स्थितमंजनाद्रिभं
प्रहस्त पृच्छैनमसौ किमागतः किमत्र कार्यं कुत एव वानरः वनं किमर्थं सकलं विनाशितं हताः किमर्थं मम
राक्षसा बलात् ५ बंधोऽपस्य तादृशमेनं हनूमंतं ब्रह्मास्त्रं कर्तृ कृत्वा ब्रह्मवरेण त्वां मदस्त्रं न पीडयिष्यतीति ब्रह्मदत्तवरेण सत्वरं
गतं हनूमान् तद्गमनं ज्ञात्वापि फल्गुरज्जुभिर्धृतोपि कार्यविशेषस्य कर्तव्यरावणदर्शनादिरूपस्य गौरवात् बद्ध इव ययावित्यर्थः २ स
भांतरस्थस्य सभामध्यस्थस्य तं हनूमंतम् बलारिजित् इंद्रजित् ब्रह्मवरेण ब्रह्मवरलब्धब्रह्मास्त्रेण समागतः बंधपीडामसहिष्णुः स्व
यमेवागत इत्यर्थः तद्वृत्तांतमाह अनेनेत्यादि एष हरिर्न लौकिक इति तत्पराक्रमकथनं अंजनाद्रिभं अंजनाचलवत् श्यामकांतिं ४ कुतः कस्माद्दे
शादागत इति शेषः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमोक्ष्यसेअस्माद्बंधनात्त्राणभयाच्चेतिशेषः अखिलराजसन्निधौअखिललोकराजस्यरावणस्यसंनिधावित्यर्थः ६ ७देवगणादीनाम मित्रशात्रौ आदिनानागादिसंग्रहः अशेषहृत्स्थितेः अशेषहृदयेषुस्थितिर्यस्यसर्वांतर्यामिणइत्यर्थः अनेनतवततःकथमपिनमोक्षइति सूचितंकिंचत्वन्मृत्युं चिकीर्षितंतस्यैवप्रेरणयासीताहृतेतिसूचितम् ८ सराघवःसुग्रीवमैत्रींकृत्वावालिनंनिहत्यतंप्रसिद्धपराक्रमंसुग्री वमेववानराणामधिपतिंचकार अनेनरामस्यकृतोपकारत्वात्तन्निमित्तंसुग्रीवः सर्ववानरैर्लंकांरोत्स्यत्येवेतिसूचितंमित्रभार्याहारिणंत्वत्तो

ततःप्रहस्तोहनुमंतमादरात्सप्रच्छकेनप्रहितोसिवानर भयंनतेमास्तुविमोक्ष्यसेमयासत्यंवदस्वाखि लराजसन्निधौ ६ ततोतिहर्षात्पवनात्मजोरिपुंनिरीक्ष्यलोकत्रयकंटकासुरम् वक्तुंप्रचक्रेरघुनाथ सत्कथांक्रमेणरामंमनसास्मरन्मुहुः ७ शृणुस्फुटंदेवगणाद्यमित्रहेरामस्यदूतोहमशेषहृत्स्थितेः य स्याखिलेशस्यहृताधुनात्वयाभार्यास्वनाशायशुनेवसद्धविः ८ सराघवोभ्येत्यमतंगपर्वतंसुग्री वमैत्रीमनलस्यसन्निधौ कृत्वैकबाणेननिहत्यवालिनंसुग्रीवमेवाधिपतिंचकारतम् ९ सवानराणा मधिपोमहाबलीमहाबलैर्वानरयूथकोटिभिः रामेणसार्द्धंसहलक्ष्मणेनभोप्रवर्षणेमर्षयुतोवतिष्ठते १० संचोदितास्तेनमहाहरीश्वराधरासुतांमार्गयितुंदिशोदश तत्राहमेकःपवनात्मजःकपिःसीतांवि चिन्वञ्छनकैःसमागतः ११ दृष्टामयापद्मपलाशलोचनासीताकपित्वाद्विपिनंविनाशितम् दृष्ट्वाततो हंरभसासमागतान्मांहंतुकामान्धृतचापसायकान् १२ मयाहतास्तेपरिरक्षितंवपुःप्रियोहिदेहोखि लदेहिनांप्रभो ब्रह्मास्त्रपाशेननिबद्धमांततःसमागतोमेघनिनादनामकः १३ श्रीरामचंद्राभ्यांनमः

प्यधिकबलंवालिनंयोहतवान् सत्वांसर्वथाहनिष्यत्येवेतिचसूचितम् ९ भोइतिरावणसंबोधिनंप्रवर्षणेतदाख्येपर्वतेमर्ष युतस्त्वद्विषयक्रोधयुतोवतिष्ठते १० धरासुतांजानकींअनेनकिमागतइत्यस्यचोत्तरंदत्तम् ११ वननाशकारणमाह कपित्वादि ति चंचलस्वभावत्वादित्यर्थः राक्षसहननहेतुमाह दृष्ट्वेति १२ वपुःस्वशरीरंपरिरक्षितंतत्रहेतुः प्रियोहीति १३ श्रीराम चंद्राभ्यांनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्यक्तागतंब्रह्मास्म्यमितिशेषः बद्धइवागतः तथागमनेहेतुर्हितंप्रवक्तुकामइतितवत्स्वचनेकिन्निमित्तमतआहकरुणेति १४ विवेकतः विवेकेनसदसद्विवेकेनलोकस्यगतिंधर्मात्स्वर्गोधर्मान्निरकइत्येवंरूपांविचार्यराक्षसींबुद्धिंत्यजेत्यर्थः संसृतेः संसाराद्योमोक्षस्तस्य हेतुकींहेतुभूतांविनयादित्वादीदृक्कुईदृशींदैवींदेवप्रोक्तांगतिंमार्गंपरपीडातोनिवृत्तिरूपंमार्गंसमाश्रयदेहिनः स्वस्यात्यंतहितायेत्यर्थः १५ ननुतस्मिन्मार्गेममनाधिकारइतिचेन्नब्राह्मणत्वादिनातत्सत्वमित्याह त्वमिति उत्तमवंशसंभवत्वस्यविवरणंपौलस्त्यपुत्रोसीति यदितेदेहएवात्मेतिबुद्धिस्तथापिपश्यविचारयत्वंराक्षसोनासिउत्तमवंशसंभवत्वेनब्राह्मणत्वादितिभावः आत्मबुध्या देहातिरिक्त आत्मेतिबुध्याराक्षसोनहिभवसीतिकिमुवक्तव्यमितिशेषः १६ एवंसर्वथाराक्षसत्वाभावंप्रसाध्याह शरीरेति शरीरं

स्पृष्ट्वैवमां ब्रह्मवरप्रभावतस्त्यक्त्वागतंसर्वमिवैभिरावण तथाप्यहंबद्धइवागतोहितंप्रवक्तुकामः करु
णारसार्द्रधीः १४ विचार्यलोकस्यविवेकतोगतिंनराक्षसींबुद्धिमिमांपरिहरावण दैवींगतिंसंसृतिमोक्ष
हेतुकींसमाश्रयात्यंतहितायदेहिनः १५ त्वंब्राह्मणोह्युत्तमवंशसंभवः पौलस्त्यपुत्रोसिकुबेरबांधवः
देहात्मबुध्यापिचपश्यराक्षसोनास्यात्मबुध्याकिमुराक्षसोनहि १६ शरीरबुद्धींद्रियदुःखसंततिर्नत्वंनच
त्वंतवनिर्विकारतः अज्ञानहेतोश्चतथैवसंततेरसत्वमस्याः स्वपतोहिदृश्यवत् १७ श्रीसीतारामाय०

स्थूलंबुद्धिः सूक्ष्मशरीरंइंद्रियाणिचक्षुरादीनितज्जन्याद्दुःखसंततिराधिव्याधिजादुःखेत्युपलक्षणंकामादेरपिसातेतवनतेषांचित्तधर्मत्वात् त्वंचतदाश्रयश्चित्तंनेतिशेषपूरणेनव्याख्येयंतस्याचेतनत्वादितिभावः नन्वात्मनएवदुःखाद्यस्तुइतिनचैवंतदत्वआहतवनिर्विकारतः विकाराभावोनिर्विकारंततः तवविकाराभावात्दुःखादिमत्त्वेचविकारप्रसंगः एवंचात्मनोविक्रियत्वप्रतिपादकश्रुतिविरोधस्तास्त्वस्मत्पक्षेनयः पूर्वंबहुशोलिखिताः नन्वेवमहंदुःखीत्यादिप्रतीतेः कागतिरित्यत्राह अज्ञानहेतोरितिस्वपतः पुरुषस्यप्रतिभासमानस्यापिदृश्य १०
स्ययथासत्वंतथाआत्मस्वरूपाज्ञानरूपाद्धेतोर्भासमानायाअस्याः संततेर्दुःखसंततेर्वस्तुतोसत्वमेवैवंचाहंदुःखीत्यादिप्रतीतिः स्वप्नकालिकवत्तत्प्रतीतिवद्भ्रमएवेतिभावः १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंसत्यंवस्तुकिमपिनास्त्येवकिंअस्तीत्याह इदंतुसत्यमितित्वत्स्वरूपंत्वित्यर्थः एतत्तवविक्रियानास्तिअविकारीचेतनएवैकःसत्यःन
तुविकारहेतत्वज्ञानमपिसत्यमेवनेत्याह नेविकारहेतुर्नन्चसत्यइतिशेषः तत्रहेतुमाह अद्वयत्वतः एकमेवाद्वितीयंब्रह्मेत्यद्वैतप्रतिपादक
श्रुतिविरोधात् तथाहिसतोद्वितीयस्यानिषेधइतिभावः ननुचित्तसंबंधान्ममदुःखमस्त्येवेतिचेन्नेत्याह यथासर्वगतमपिनभः पृथिव्या-
दिरूपगंधादिभिर्नलिप्यतेसूक्ष्मत्वात्तथादेहगतोपिचित्तसमानाधिकरणोपियतःसूक्ष्मकोतिसूक्ष्मोतस्तत्कृतदुःखादिभिर्वत्कृतो-
नलिप्यते एवंचनीलंनभइत्यादिप्रतीतिवदहंदुःखीत्यादिप्रतीतिर्भ्रम एवेतिभावः ननुतर्हिभक्तसंसारिव्यवस्थाकिंन्नास्त्येवास्ती

इदंतुसत्यंतवनास्तिविक्रियाविकारहेतुर्नचतेद्वयत्वतः यथानभःसर्वगतंनलिप्यतेतथाभवान्देहगतोपि
सूक्ष्मकः देहेंद्रियप्राणशरीरसंगतस्त्वात्मेतिबुध्याखिलबंधभाग्भवेत् १८ चिन्मात्रमेवाहम
जोहमक्षरोत्थानंदभावोहमितिप्रमुच्यते देहो ऽ प्यनात्मापृथिवीविकारजोनप्राणआत्मानिलएष
एवसः १९ श्रीरामायनमः

स्याहदेहेत्यादिदेहोत्रसूक्ष्मःशरीरंस्थूलंतत्संगतस्तदविवेकाग्रहात् तेष्वेवयात्मबुद्धिस्तयाखिलबंधभाग्भवेत् अविवेकएवमुख्यसंसा
रकारणमितिभावः १८ ननुतर्हिमुक्तिर्दुर्लभेतिशंकायांतत्कारणमाह चिन्मात्रमितिविवेकज्ञानमेवमोक्षकारणमितितमाह तत्रायाः
र्द्धेनात्मनिजडवैधर्म्यमुक्तंअजत्वेनोत्पत्तिराहित्यंअक्षरत्वेनाविनाशित्वंआनंदभावःतद्रूपःदेहादौतद्वैधर्म्यमाहदेहोपीतिपृथिवीविकारैः
स्तस्य स्माणुभिर्जनितइति अनात्मा अनेनाचेतनत्वजन्यत्वादिवैधर्म्यमुक्तंप्राणोप्यात्मानयतएषोबहिर्दृश्यमानोजडोनिलएवसप्राणोयःप्रा
णःसवायुरितिश्रुतेः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोपिनात्मेत्याहमनोपीतिनोइत्यस्यात्मेतिशेषःनातस्तत्‌अहंकारस्यविकारः नचापिबुद्धिरिति बुद्धिरहंकारोपिनात्मायतःप्रकृतेर्विकारान्महतोजायतइतिप्रकृतेर्विकारजाआत्मनिउक्तमेववैधर्म्यंदार्ढ्यायपुनराह आत्मेत्यादिसएवेश्वरःअनेनचेतनानेकत्वंनिरस्तम्‌ २० निरंजनइत्यस्यैवव्याख्यासदाउपाधितोमुक्तःउपाधिभूतचित्तधर्मैर्दुःखादिभिरलिप्तइत्यर्थःएवमात्मानंज्ञात्वाइतःसंसाराद्विमुच्यतेनन्वीदृशज्ञानमेवकथंस्यात्तत्राहातोहमितिमोक्षस्यात्यंतिकंसाधनंनियतंसाधनमित्यर्थः २१भक्तिज्ञान-माह विष्णोर्हरीतिधियश्चित्तस्यनित्यानित्यविवेकद्वाराज्ञानंआत्माचिदानंदमयइत्यादिनोक्तंततःतद्विषयनिदिध्यासनतः विशुद्ध

मनोप्यहंकारविकारएवनोनचापिबुद्धिःप्रकृतेर्विकारजा आत्माचिदानंदमयोविकारवान्देहादिसंघात्व्यतिरिक्तईश्वरः २०निरंजनोमुक्तउपाधितःसदाज्ञात्वैवमात्मानमितोविमुच्यते अतोहमात्यंतिकमोक्षसाधनंवक्ष्येश्रृणुष्वावहितोमहामते २१ विष्णोर्हिभक्तिःसुविशोधनंधियस्ततोभवेज्ज्ञानमतीवनिर्मलम्‌ विशुद्धतत्वानुभवोभवेत्ततःसम्यग्विदित्वापरमंपदंव्रजेत्‌ २२ अतोभजस्वाद्यहरिंरमापतिंरामंपुराणंप्रकृतेःपरंविभुम्‌ विसृज्यमौर्ख्यंहृदिशत्रुभावनांभजस्वरामंशरणागतप्रियम्‌ २३सीतांपुरस्कृत्यसपुत्रबांधवोरामंनमस्कृत्यविमुच्यसेभयात्‌ २३ रामंपरात्मानमभावयन्जनोभक्त्याहृदिस्थंसुखरूपमद्वयम्‌ कथंपरंतीरमवाप्नुयाज्जनोभवांबुधेर्दुःखतरंगमालिनः २४ ॐ

तत्वानुभवोभवेत्‌ अपरोक्षसाक्षात्कारोभवेत्‌ तंपरमंपदंब्रह्मसायुज्यं २२ उपसंहरति अतइति यस्यभक्तिज्ञानसाधनंसविष्णुरयमेवतद्बोधकेविशेषणेहरिंरमापतिमिति ननुदशरथपुत्रोयंनसइत्यत्राह प्रकृतेःपरमित्यादिदशरथपुत्रत्वादितुकल्पितमित्याशयः मौर्ख्यंअयंमनुष्यइतिबुद्धिरूपंतत्कृतांशत्रुत्वेनभावनांचविसृज्यभजस्वसंप्रतियुक्तंभजनप्रकारमाह सीतामिति २३ अथव्यतिरेकमुखेनतत्तद्भावनाप्रकारमाह राममिति हृदिस्थमित्यनेनांतर्यामितयाप्रेरकत्वमुक्तम्‌ सुखरूपोद्वितीयोमत्प्रेरकइत्येवमभावयन्नितियावत्‌दुःखरूपास्तरंगमालायस्यतस्य २४ श्रीसीतारामचंद्राभ्यांनमानमः ११

ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोचेत मद्रुक्ताकरणेतेनज्वलंतमात्मानमरक्षिता लुरिरूपंकिंच स्वकृतैः पातकैः सीताहरणादिभिररिवव आत्मानमधोधोनयसिन्नयिष्यसीत्यर्थः
आर्षं विमोक्षशंकानसंभावनापिनभविष्यतीत्यर्थः २५ अमृतास्वादेतितदास्वादेनसमानआस्वादोयस्यतादृशंभाषितमित्यर्थः २६ वनेचरःस्त
ग्रीवः केषांमध्येतिशायिनोनकेषामपीत्यर्थः २७ विवृद्धकोपेनकरणेनेत्यर्थः असकृत्दहन्निवाहेतिशेषः २८ अधमेत्यत्रक्रोधातिशयेनद्रूरासं
बोधनेप्लुतः २९ पार्श्वेस्थितंराक्षसमित्यन्वयः खंडशः कुर्विंतिशेषः असकृरस्यममभित्राणिबांधवाश्चपश्यंतु ३० हेराजन् अयंपरराजस्यो

नोचेत्त्वमज्ञानमयेनवह्निनाज्वलंतमात्मानमरक्षितारिवत् नयस्यधोधःस्वकृतैश्चपातकैर्विमोक्षशंकानतं
भविष्यति २५ श्रुत्वामृतास्वादसमानभाषितंतद्वायुसूनोर्दशकंधरोऽसकृत् अमृष्यमाणोतिरुषाकपीश्वरं
जगादरक्तांतविलोचनोज्वलन् २६ कथंममाग्रेविलपस्यभीतवत्प्लवंगमानामधमोसिदृष्टधीः क्वएष
रामः कतमोवनेचरोनिहन्मिसुग्रीवयुतंनराधमम् २७ त्वांचाद्यहत्वाजनकात्मजांततोनिहन्मिरामंस
हलक्ष्मणंततः सुग्रीवमग्रेबलिनंकपीश्वरंसवानरैर्हन्म्यचिरेणवानर श्रुत्वादशग्रीववचःसमारुति
विवृद्धकोपेनदहन्निवासकृत् २८ नमेसमारावणकोटयोधमारामस्यदासोऽहमपारविक्रमः श्रुत्वाति
कोपेनहनूमतोवचोदशाननोराक्षसमेकमब्रवीत् २९ पार्श्वेस्थितंमारयखंडशःकपिंपश्यंतुसर्वेसुरमित्र
बांधवाः निवारयामासततोविभीषणोमहासुरंसायुधमुद्यतंवधे ३० राजन्वधार्होनभवेत्कथंचन
प्रतापयुक्तैःपरराजवानरः हतेस्मिन्वानरदूतेवार्ताकोवानिवेदयेत् रामायत्वंयमुद्दिश्यवधायसमुपस्थि
तः ३१ अतोवधसमंकिंचिदन्यच्चिंतयवानरे सचिन्होगच्छतुहरिर्यंदृष्ट्वायास्यतिद्रुतम् ३२

दूतस्तराजस्यशत्रु
राजस्यवावानरोवधयोग्योनभवेत् प्रतापयुक्तैराजभिर्वधयोग्यतासंभावनमप्यनुचितंदूतत्वात्किंपुनर्वधइतिभावः अयंप्रताप
युक्तैरिंद्रजिदादिभिरपिवधयोग्योनेतिवृथाप्रयासइतिव्यंग्यम् वधे बाधकांतरमप्याह हतेइतिवार्तांसीतावार्तांनिवेदयेन् रामायेत्यन्वयः यं
रामस्यत्वंवधायसमुपस्थितः यंरामसुद्दिश्यत्वमात्मवधायसमुपस्थितः आत्मवधार्थंतदापसनेच्छावान् सतस्यच्छंदः क्वय
मत्रागच्छेदितिगूढोऽर्थः ३१ आयास्यतीतिछेदः ३२ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ तिशेषः ३५ ३६ ३७ ३८ किंचित्नगरदाहम् ३९ सूक्ष्मोभूत्वाबंधान्निःसृतः ततः पुनरपिपर्वताकारोबभूवततोगोपुरंपुरद्वारमुत्
प्लुत्यतत्रविद्यमानमेकंस्तंभम् ४० कार्यशेषंलंकादाहरूपं ४१ ४२ हातातेत्यादिक्रंदमानाः प्रासादशिखरे आरूढाअपिव्याप्ता

रामःसुग्रीवसहितस्ततोयत्कृतंभवेत्तव बिभीषणवचःश्रुत्वारावणोप्येतदब्रवीत् ३३ वानराणांहिलां
गूलेमाहामानोभवेत्किल अतोवस्त्रादिभिःपुच्छंवेष्टयित्वाप्रयत्नतः ३४ वह्निनायोजयित्वैनंग्रामयि
त्वापुरेभितः विसर्जयतपश्यंतुसर्वेवानरयूथपाः ३५ तथेतिशाणपट्टैश्चवस्त्रैरन्यैरनेकशः तैलाक्तैर्वेष्ट
यामासुर्लांगूलंमारुतेर्दृढम् ३६ पुच्छाग्रेकिंचिदनलंदीपयित्वाथराक्षसाः रज्जुभिःसुदृढंबध्वाधृत्वा
तंबलिनोसुराः ३७ समंताद्भ्रामयामासुश्चोरोयमितिवादिनः तूर्यघोषैर्घोषयंतस्ताडयंतोमुहुर्मुहुः ३८
हनूमतापितत्सर्वंसोढंकिंचिच्चिकीर्षुणा गत्वातुपश्चिमद्वारसमीपंतत्रमारुतिः ३९ सूक्ष्मोबभूवबंधेभ्यो
निःसृतःपुनरप्यसौ बभूवपर्वताकारस्ततउत्प्लुत्यगोपुरं ४० तत्रैकंस्तंभमादायहत्वातानरक्षिणःक्षणात्
विचार्यकार्यशेषंसःप्रासादाग्राद्गृहाद्गृहम् ४१ उत्प्लुत्योत्प्लुत्यसंदीप्तपुच्छेनमहताकपिः ददाहलंकामखि
लांसाट्टप्रासादतोरणाम् ४२ हातातपुत्रनाथेतिक्रंदमानाःसमंततः व्याप्ताःप्रासादशिखरेप्यारूढादैत्ये
त्ययोषितः ४३ देवताइवदृश्यंतेपतंत्यःपावकेखिलाः बिभीषणगृहंत्यक्त्वासर्वंभस्मीकृतंपुरम् ४४
ततउत्प्लुत्यजलधौहनूमान्मारुतात्मजः लांगूलंमज्जयित्वांतःस्वस्थचित्तोबभूवसः ४५ वायोःप्रिय
सखित्वाच्चसीतयाप्रार्थितोनलः नददाहहरेःपुच्छंबभूवात्यंतशीतलः ४६

वह्निनेतिशेषः ४३ वन्हौपतंत्योदेवताइवदृश्यंते ४४ जलधौतत्समीपंउत्प्लुत्यांतःसमुद्रमध्येलांगूलंमज्जयित्वास्वस्थचि
त्तोबभूव ४५ वायोःप्रियमित्रत्वात् सीताप्रार्थनेनचानलोग्निर्वायुपुत्रस्यहरेः पुच्छंनददाहतावन्मात्रमेवनकिंतुत्वंतंशीत १२
लश्चबभूव ४६ श्रीसीतारामायनमः ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्नामस्मरणेनधूतानिदुरिकृतानिसमस्तपापानियैस्तेतापत्रयमाध्यात्मिकाधिभौतिकाधिदैविकभेदात्तज्जन्यंवन्हिमपितरंति
तेननपीड्यंतइत्यर्थः ४७ इतिश्रीमत्स० सुंदर० चतुर्थःसर्गः ४ अथलंकादाहेशोकवनस्थानदाहेपिसीतायाः दाहसंदेह
निवृत्तयेपुनः सीतांदृष्ट्वातामापृच्छगतइत्याह ततइतिहेदेविरामसंन्निधिंगच्छामिभ वतीमामाज्ञापयत्वित्यन्वयः १ सानु
जोरामस्त्वांद्रष्टुमागमिष्यतीत्युक्त्वाजानकींत्रिःपरिक्रम्यदक्षिणंकृत्वा २ पुनःप्रणम्यगंतुंप्रस्थितइदंवक्ष्यमाणंअब्रवीत्

यन्नामसंस्मरणधूतसमस्तपापास्तापत्रयानलमपीहतरंतिसद्यः तस्यैवकिंरघुवरस्यविशिष्टदूतःसंत
प्यतेकथमसौप्रकृतानलेन ४७ इतिश्रीम० संदरकांडेचतुर्थःसर्गः ४ श्रीमहादेवउवाच ततःसीतांन
मस्कृत्यहनूमानब्रवीद्वचः आज्ञापयतुमांदेविभवतीरामसन्निधिम् १ गच्छामिरामस्त्वांद्रष्टुमाग
मिष्यतिसानुजः इत्युक्त्वात्रिःपरिक्रम्यजानकींमारुतात्मजः २ प्रणम्य प्रस्थितोगंतुंइदंवचनम
ब्रवीत् देविगच्छामिभद्रंतेतूर्णंद्रक्ष्यसिराघवम् ३ लक्ष्मणंचससुग्रीवंवानरायुतकोटिभिः ततः
प्राहहनूमंतंजानकीदुःखकर्शिता ४ त्वांदृष्ट्वाविस्मृतंदुःखमिदानींत्वंगमिष्यसि इतःपरंकथं
वर्तेरामवार्ताश्रुतिंविना ५ मारुतिरुवाच यद्येवंदेविमेस्कंधमारोहक्षणमात्रतः रामेणयोजयि
ष्यामिमन्यसेयदिजानकि ६ सीतोवाच रामःसागरमाशोष्यबध्वावाशरपंजरैः आगत्यवानरैः
सार्द्धंहत्वारावणमाहवे ७ मांनयेद्यदिरामस्यकीर्तिर्भवतिशाश्वती अतोगच्छकथंचापिप्राणान्
संधारयाम्यहम् ८ इतिप्रस्थापितोवीरःसीतयाप्रणिपत्यताम् जगामपर्वतस्याग्रेगंतुंपारंम-
होदधेः ९

तेभद्रमितिविनयोक्तिः ३ ४ वार्ताश्रुतिंवार्ताश्रवणम् ५ यद्येवंरामवार्ताश्रवणंविनास्थातुमशक्यत्वं यदिमन्यसेयद्ये
तत्तवचित्ते आयातितर्हिआन्वरेतिशेषः ६ आशोष्येतिमुख्यः पक्षःदययानदकृत्वेबध्वावेति शरपंजरैः शरसमूहैः ७ यदिराव
णंहत्वामांनयेत्तर्हिरामस्यशाश्वतीकीर्तिर्भवेत्कथंचापिकथंचिदित्यर्थःमहोदधेःपारंगंतुंपर्वतस्याग्रेउपरिभागेजगाम ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महासत्वोमहाबलस्तत्रोर्ध्वशिखरेगत्वापर्वतस्थमहीतलंजगामेत्यन्वयःकर्षः १० तद्गमनमप्यंशेननकिंतुसंपूर्णएवगतइत्याह त्रिं·
शद्योजनंमहीतलउच्छ्रितोऽपिमहीसमानत्वंजगामगगनांतस्थःगगनमध्यस्थः तंमहांतंशब्दंमहान्स्वनःप्रतिध्वनिर्यस्यतंशा
ब्दंचक्रुः १२ हनूमानेवायंकृतकार्यःसमागतइतिशब्देनैवजानीमःकेचिद्वानराइष्वावानरर्षभं पश्यध्वमित्याहुः १३ १४

तत्रगत्वामहासत्वःपादाभ्यांपीडयन्गिरिम् जगामवायुवेगेनपर्वतस्थमहीतलम् १० ततोमहीसमान
त्वंत्रिंशद्योजनमुच्छ्रितः मारुतिर्गगनांतस्थोमहाशब्दंचकारसः ११ तंश्रुत्वावानराःसर्वेज्ञात्वामारुति
मागतं हर्षेणमहताविष्टाःशब्दंचक्रुर्महास्वनम् १२ शब्देनैवविजानीमःकृतकार्यःसमागतः ह
नूमानेवपश्यध्वंवानरावानरर्षभम् १३ एवंब्रुवत्सुवीरेषुवानरेषुसमारुतिः अवतीर्यगिरेर्मूर्ध्नि
वानरानिदमब्रवीत् १४ दृष्टासीतामयालंका धर्षिताचसकानना संभाषितोदशग्रीवस्ततोहंपुन
रागतः १५ इदानीमेवगच्छामोरामसुग्रीवसन्निधिं इत्युक्त्वावानराःसर्वेहर्षेणालिंग्यमारुतिम् १६
केचिच्चुचुंबुर्लांगूलंननृतुःकेचिदुत्सुकाः हनूमतासमेतास्तेजग्मुःप्रस्रवणंगिरिम् १७ गच्छंतोददृ
शुर्वीरावनंसुग्रीवरक्षितम् मधुसंज्ञंतदाप्राहुरंगदंवानरर्षभाः १८ क्षुधिताःस्मोवयंवीरदेह्यनु
ज्ञांमहामते भक्षयामःफलान्यद्यपिबामोमृतवन्मधु १९ संतुष्टोराघवंद्रष्टुंगच्छामोद्यैवसानुजम् २०
अंगदउवाच हनूमान्कृतकार्योयंपिबतैतत्प्रसादतः जक्षध्वंफलमूलानित्वरितंहरिसत्तमाः २१
ततःप्रविश्यहरयःपातुमारेभिरेमधु रक्षिणस्ताननादृत्यदधिवक्त्रेणनोदितान् २२ पिबतस्ता
डयामासुर्वानरान्वानरर्षभाः ततस्तान्मुष्टिभिःपादैश्चूर्णयित्वापपुर्मधु २३ श्रीसीतारामायनमः

पूर्वंसीतापदोक्तोपदांतरोच्चारणपर्यंतंक्रियापदसंदेहःस्यादितिपूर्वंदृष्टेतिउक्तिः १५ १६ केचिच्चुचुंबुरित्यादिहर्षाविष्टवानरजा
तिलक्षणम् १७ १८ १९ संतुष्टाःफलभक्षणेनमधुपानेनच २० जक्षध्वंभक्षयतेत्यर्थः २१ दधिवक्त्रोनामतद्रक्षिणां
मुख्यस्तद्रक्षणाधिकृतः २२ वानरर्षभाःदधिवक्त्रप्रेरिताःपिबतोवानरान्ताडयामासुरित्यन्वयः २३ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२४ कुमारेणांगदेनहनुमताचनष्टंनाशितमित्यर्थः २५ हृष्टाआगतइतिच्छेदः २६ नोचेन्नममधुवनंद्रष्टुंकःसमर्थोभवेत् २७ अनिहृ·
षीत्बहुमानेसुग्रीवंप्रतिराजन्निितिवचः २८ अवनीसुताजानकी २९ मममधुवनंद्रष्टुंनसमर्थाइत्यन्वयः ३० भोरक्षिणोवोयुष्मा
कंभयंवानरेभ्यस्ताडनजंमास्तु अतोममाज्ञयागत्वांगदप्रमुखान्वानरान्ब्रूतयुष्मान् रामसुग्रीवावाकारयतइतिशेषः इत्युक्त्वाम्

ततोदधिमुखःक्रुद्धःसुग्रीवस्यसमातुलः जगामरक्षिभिःसार्द्धंयत्रराजाकपीश्वरः२४ गत्वातमब्रवीद्दे
वचिरकालाभिरक्षितं नष्टंमधुवनंतेद्यकुमारेणहनूमता २५ श्रुत्वादधिमुखेनोक्तंसुग्रीवोहृष्टमानसः
हृष्टागतोनसंदेहःसीतांपवननंदनः२६ नोचेन्मधुवनंद्रष्टुंसमर्थःकोभवेन्मम तत्रापिवायुपुत्रेणाकृतं·
कार्यंनसंशयः २७ श्रुत्वासुग्रीववचनंहृष्टोरामस्तमब्रवीत् किमुच्यतेत्वयाराजन्वचःसीताकथान्वितम्
२८ सुग्रीवस्त्वब्रवीद्वाक्यंदेवहृष्टावनीसुता हनूमत्प्रमुखाःसर्वेप्रविष्टामधुकाननं २९ भक्षयंतिस्मसक·
लंताडयंतिस्मरक्षिणः अकृत्वादेवकार्यंतेद्रष्टुंमधुवनंमम ३० नसमर्थास्ततोदेवीहृष्टासीतेतिनिश्चितं
रक्षिणोवोभयंमास्तु गत्वाब्रूतममाज्ञया ३१ वानरानंगदमुखानानयध्वंममांतिकं श्रुत्वासुग्रीववच
नंगत्वातेवायुवेगतः ३२ हनूमत्प्रमुखान्नूचुर्गच्छतेश्वरशासनात् द्रष्टुमिच्छतिसुग्रीवःसरामोलक्ष्मणा
न्वितः ३३ युष्मानतीवहृष्टास्तेत्वरयंतिमहाबलाः तथेत्यंबरमासाद्ययुयुस्तेवानरोत्तमाः ३४ हनूमंतं
पुरस्कृत्ययुवराजंतथांगदम् रामसुग्रीवयोरग्रे निपेतुर्भुविसत्वरं ३५ हनूमान्राघवंप्राहदृष्टासीतानि
रामया साष्टांगंप्रणिपत्याग्रेरामंपश्चात्हरीश्वरं ३६ कुशलंप्राहराजेंद्रजानकीत्वांशुचान्विता अशो
कवनिकामध्येशिंशपामूलमाश्रिता ३७ राक्षसीभिःपरिवृतानिराहाराकृशाप्रभो हारामरामरा·
मेतिशोचंतीमलिनांबरा ३८

मांतिकंमत्समीपंवानानयध्वं ३१।३२।३३ अतीवहृष्टास्तेरामसुग्रीवलक्षणाःयुष्मान्स्वसमीपागमनायत्वरयंति ३४ भूसंबंधोन
रंराघवाश्वासनायपूर्वंदृष्टासीतेत्याहततःक्रमेणरामसुग्रीवौप्रणिपत्य ३५।३६ जानकीकुशलंप्राहेत्याहशुचाशोकेन ३७ हाइति
शोकव्यंजनमात्रं ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मारभ्यतवकथांब्रुवतामयासूक्ष्मरूपेणवृक्षशाखांतरेस्थित्वाशनैराश्वासितेत्यन्वयः ३९ अत्यर्थंविस्तरेणदंडकागमनादिकथोक्तेतिशेषः
त्वयिरहितेदेशांतरंगतेसतिजानक्याःदशाननेनहरणमित्यन्वयः ४० वालिनिबर्हणांतद्वधंकृत्वायथासुग्रीवेणमैत्रीसफलाकृतेति
शेषः ४१ ४२ ४३ ४४ सः येनोक्तंसइत्यर्थः ४५ ४६ ४७ तेनअंगुलीयकलाभेनराघवस्यासःसेवकइत्यतिविश्वस्ताराक्षसीनांतर्ज

एकवेणीमयादृष्टाशनैराश्वासिताशुभा वृक्षशाखांतरेस्थित्वासूक्ष्मरूपेणतेकथाम् ३९ जन्मारभ्यतवात्य
र्थंदंडकागमनं तथा दशाननेनहरणंजानक्यारहितेत्वयि ४० सुग्रीवेणयथामैत्रीकृत्वावालिनिबर्हणम्
मार्गणार्थंचवैदेह्याःसुग्रीवेणविसर्जिताः ४१ महाबलामहासत्वाहरयोजितकाशिनः गताःसर्वत्रसर्वेवै
तत्रैकोहमिहागतः ४२ अहंसुग्रीवसचिवोदासोहंराघवस्यहि दृष्टायज्जानकीभाग्यात्मयासःफलितोद्य
मे ४३ इत्युदीरितमाकर्ण्यसीताविस्फारितेक्षणा केनवाकर्णपीयूषंश्राविताऽमेशुभाक्षरं ४४ यदिसत्यंतदा
यातुमद्दर्शनपथं त्वसः ततोहंवानराकारःसूक्ष्मरूपेणजानकीम् ४५ प्रणम्यप्रांजलिर्भूत्वादूरादेवस्थितः
प्रभो पृष्टोहंसीतयाकस्त्वमित्यादिबहुविस्तरम् ४६ मयासर्वंक्रमेणैवविज्ञापितमरिंदम पश्चान्मयार्पितं
देव्यैभवद्दत्तांगुलीयकम् ४७ तेनमामतिविश्वस्तावचनंचेदमब्रवीत् यथादृष्टास्मिहनुमन्पीड्यमानादिवा
दिशं ४८ राक्षसीनांतर्जनैस्तत्सर्वंकथयराघवे मयोक्तंदेविरामोपित्वच्चिंतापरिनिष्ठितः ४९ परिशोचत्य
होरात्रंत्वद्वार्तानाधिगम्यसः इदानीमेवगत्वाहंस्थितिंरामायतेब्रुवे ५० रामःश्रवणमात्रेणसुग्रीवेणसल
क्ष्मणः वानरानीकपैःसार्द्धमागमिष्यतितेंतिकम् ५१ रावणंसकुलंहत्वानेष्यतित्वांस्वकंपुरं अभिज्ञांदेहिमे
देवियथामांविश्वसेद्विभुः ५२ इत्युक्त्वासाशिरोरत्नंचूडापाशेस्थितंप्रियम् दत्वाकाकेनयद्वृत्तंचित्रकूटगि
रौपुरा ५३

नैःपीड्यमानायथादृष्टास्मितत्सर्वंपीडनंराघवेकथय ४८ त्वच्चिंतापरिनिष्ठितः त्वच्चिंतायांस्थितः ४९
त्वद्वार्तानाधिगम्यअहोरात्रंपरिशोचतित्वामितिशेषः ५० ५१ विश्वसेत्सत्यंजानकींदृष्ट्वाआगतइतिविश्वसेदित्यर्थः ५२ शि
रोरत्नंदत्वाचित्रकूटगिरिस्थंकाकवृत्तमप्याह ५३ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततःसंदेशमाहेतिशेषः तमाहाश्रुपूर्णाक्षीतियन्मेकिंचिद्दुरुक्तंदुर्वचोभाषितंतंतल्लक्ष्मस्वतदज्ञभावेनाज्ञतयामयाभाषितम् अतो
यथामांरामोस्मात्दुःखात्तारयेत्तथाकृपान्वितःकुरुइतिलक्ष्मणंब्रूहीत्यन्वयः ५४ ५५ महतादुःखेनावृताआसीदितिशेषः सर्वमे
वव्रत्तांतंवदतामयापिसाआश्वासिता ५६ प्रियांरावणस्येतिशेषः ५७ उत्साद्यउत्पाटितवृक्षांकृत्वा ५८ पुनरप्यगमंत्वत्समीप॰

तदप्याहाश्रुपूर्णाक्षीकुशलंब्रूहिराघवं लक्ष्मणंब्रूहिमेकिंचिद्दुरुक्तंभाषितंपुरा ५४ तत्क्षमस्वाज्ञभावेनभा॰
षितंकुलनंदन तारयेन्मांयथारामस्तथाकुरुकृपान्वितः ५५ इत्युक्त्वारुदतीसीतादुःखेनमहतावृता मया
प्याश्वासितारामवदतासर्वमेवते ५६ ततःप्रस्थापितोरामत्वत्समीपमिहागतः तदागमनवेलायामशोकव
निकांप्रियां ५७ उत्साद्यराक्षसांस्तत्रबहून्हत्वाक्षणादहम् रावणस्यसुतंहत्वारावणेनाभिभाष्यच ५८ लं
कामशेषतोदग्ध्वापुनरप्यगमंक्षणात् श्रुत्वाहनूमतोवाक्यंरामोत्यंतप्रहृष्टधीः ५९ हनूमंस्तेकृतंकार्यंदेवै
रपिसुदुष्करम् उपकारंनपश्यामितवप्रत्युपकारिणः ६० इदानींतेप्रयच्छामिसर्वस्वंममनमारुते इत्या
लिंग्यसमाकृष्यगाढंवानरपुंगवं ६१ साद्रनेत्रोरघुश्रेष्ठःपरांप्रीतिमवापसः हनूमंतमुवाचेदंराघवोभक्तव
त्सलः ६२ परिरंभोहिमेलोकेदुर्लभःपरमात्मनः अतस्त्वंममभक्तोसिप्रियोसिहरिपुंगव ६३ यत्पादपद्म
युगलंतुलसीदलाद्यैःसंपूज्यविष्णुपदवीमतुलांप्रयांति तेनैवकिंपुनरसौपरिरब्धमूर्तीरामेणवायु॰
तनयःकृतपुण्यपुंजः ६४ इतिश्रीमदध्यात्मरामायणेसुंदरकांडेपंचमःसर्गः समाप्तः ५ सुंदरकांडेसर्गाः
पंचैवात्र्याध्यात्मिकशब्दिते प्रोक्तास्त्रीणिशतानिश्लोकास्त्रिभुवनपापहराः श्रीसीतारामचंद्राभ्यांनमः

मितिशेषः प्रहृष्टधीः प्रहृष्टचेताः ५९ प्रत्युपकारिणः मांप्रतिकृतोपकारस्य ६० सर्वस्वंआलिंगनं ६१ सः जगत्कर्तृत्वादिपर
मैश्वर्यवान् ६२ आलिंगनस्यसर्वस्वत्वमुपपादयन्नाह परिरंभइतियतस्त्वंममभक्तोसिअतस्त्वयायंलब्धइतिशेषः ६३ कृत॰
पुण्यपुंजोवायुतनयः तेनैवरामेणपरिरब्धमूर्तिरतुलांपदवींप्रयांतीतिकिंपुनर्वक्तव्यमितिशेषः ६४ इतिश्रीमत्सकलराजविप॰
सुंदरकांडेपंचमःसर्गः ५ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्रीमदध्यात्मरामायणेसुंदरकांडंसमाप्तम् ·

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=08.06.20 15:27
,TRANSFERRED=2020/06/08 at 15:33:05
,PAGES=33
,TYPE=STD
,NAME=S0003097
,Book Name=M-2923-SHRIMAD DHYATAM RAMAYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection